603297238/

श्रीहरिः ।

महावैयाकरण चङ्गदास निर्मिता

॥ चंगदास कारिका ॥

साच

छपरा प्रान्त गह्मरियाग्राम निवासिना

(दिनेशोपनाम्ना) सूर्य्य त्रिपाठिना

बहुतराशुद्धिंगता संशोध्य प्रकाशिता;

तत्कृतया संक्षिप्तयाटीकया सटीकापि

सम्बर्धिता ।

इयमेव हरिभट्टस्य कारिकेतिकेऽपि

व्याहरन्ति ।

नाधिकारी भवितुमर्हतिकश्चिदेतस्या

मुद्रणेऽन्योऽपि

प्रिण्टर—ठाकुरप्रसाद मिश्र द्वारा पाटलिपुत्रे

सत्यसुधाकर यन्त्रालये मुद्रिता ।

Cong. I

G.E. L0116606

| Cang. |

बाबू कालेश्वरसिंह शर्म्मा,
संस्कृत पुस्तकालय
कचौड़ी गली, बनारस सिटी।

भवानी शङ्करौनत्वा प्रकृतिप्रत्ययावुभौ ।
भट्टश्रीचङ्गदासेन क्रियतेचङ्गकारिका ॥१॥

यस्मिन्नर्थेविधीयन्तेत्यादितव्यादितद्धिताः
समासोवाभवेद्यत्र सउक्तप्रथमाततः ॥ १ ॥
उक्तस्यार्थस्यगृह्णन्ति संख्यानंत्यादयःपरम्
लिङ्गसंख्याविभक्तिस्तुकृत्तद्धितसमासकाः ॥२॥
द्वयोर्नाम्नोर्वहूनांवा यदिवाक्यंसमुच्चये
अङ्गाचयाश्रितासंख्यात्याद्यादौवाविशेषणे ॥३॥
प्रकृतेर्विकृतेर्वापियत्रोक्तंद्वंद्वयोरपि
वाचकःप्रकृतेस्संख्यांगृह्णातिविकृतेर्नतु ॥४॥
विशेषणसहैकार्थं भवेद्यत्रविशेषणम्
तत्रलिङ्गादयःप्रायोविशेषस्थाविशेषणे ॥ ५ ॥

अंकुरोभवति अवगाहते सरसींकुञ्जरः अवगाह्यते सरसी कुञ्जरेण । तव्यादिर्यथा वसेस्तव्यः कर्त्तरिणिच्चरुढित्वात् वास्तव्यो देवदत्त; । अनुक्तकर्तायथाकर्त्तव्यः कटोभवता । तद्धित प्रत्ययायथा वैयाकरणो देवदत्तः । शतिकः पटः । समासोयथा । आरुढोवानरोवृक्षं सआरुढ़ वानरोवृक्षः ॥ १ ॥ पुरुषःकरोति पुरुषौकुरुतः पुरुषाः कुर्वन्ति। कारकः पुरुषः कारिकास्त्रीकारकंकुलम् । वैयाकरणः पुरुषः वैयाकरणी स्त्री वैयाकरणंकुलम् आरुढ़वानरोयांशाखां सारुढ़वानरशाखा आरुढ़ो

BODLEIAN
6 JUL 1999

G E. L01166606

बाबू कालश्वरसिंह शर्म्मा,
संस्कृत पुस्तकालय
चौड़ी गली, बनारस सिटी।

ॐ

❀ श्रीगणेशाय नमः ❀

॥ अथ चङ्गदास कारिका ॥

यस्मिन्नर्थेविधीयन्तेत्यादितव्यादितद्धिताः
समासोवाभवेद्यत्र सउक्तप्रथमाततः ॥ १ ॥
उक्तस्यार्थस्यगृह्णन्ति संख्यानंत्यादयःपरम्
लिङ्गसंख्याविभक्तिस्तुकृत्तद्धितसमासकाः ॥२॥
द्वयोर्नाम्नोर्वहूनांवा यदिवाक्यंसमुच्चये
अङ्गाचयाश्रितासंख्यात्याद्यादौवाविशेषणे ॥३॥
प्रकृतेर्विकृतेर्वापियत्रोक्तंद्वंद्वयोरपि
वाचकःप्रकृतेस्संख्यांगृह्णातिविकृतेर्नतु ॥४॥
विशेषेणसहैकार्थं भवेद्यत्रविशेषणम्
तत्रलिङ्गादयःप्रायोविशेषस्थाविशेषणे ॥ ५ ॥

अंकुरोभवति अवगाहते सरसींकुञ्जरः अवगाह्यते सरसी कुञ्जरेण । तव्यादिर्यथा वसेस्तव्यः कर्त्तरिणिच्चरुढित्वात् वास्तव्यो देवदत्तः । अनुक्तकर्तायथाकर्त्तव्यः कटोभवता । तद्धित प्रत्ययायथा वैयाकरणो देवदत्तः । शतिकः पटः । समासोयथा । आरुढोवानरोवृक्षं सआरुढ़ वानरोवृक्षः ॥ १ ॥ पुरुषःकरोति पुरुषौकुरुतः पुरुषाः कुर्वन्ति । कारकः पुरुषः कारिकास्त्रीकारकंकुलम् । वैयाकरणः पुरुषः वैयाकरणी स्त्री वैयाकरणंकुलम् आरुढ़वानरोयांशाखां सारुढ़वानरशाखा आरुढ़ो

BODLEIAN
6 JUL 1900

वानरोयद्वृक्षाग्रं तदारुढवानरंवृक्षाग्रं ॥ २ ॥ अङ्गमवयवः चयः समुदा यस्तदाश्रितासंख्याज्ञेया । हरिश्चहरश्चजयतः जयतिवा जीतवान् जीतवन्तौवा । हरिश्चहरश्चकमलासनश्च जयन्तिवा जीतवान् जयति । पूजितव्याः पूजितव्योवा । तेजस्वीतेजस्विनोवादत्तकुसुमाः दत्ताकुसुमोवा । आदिशब्देनकृत्तद्धितसमासेषु । सचत्वंच गतः गतोवा ॥ ३ ॥ स्वर्णंकुण्डलेभवति बीरणानिकटः क्रियते सुवर्णानिकुण्डलं क्रियन्ते । तण्डुलानि ओदनंपच्यन्ते ॥ ४ ॥ द्विजः पण्डितो भवति । क्रियतेकटो महान्देवदत्तेन । चतुरेण विप्रेणकृतः । कुलीनायब्राह्मणाय देहि । महतः पर्वतादवरोहति । राज्ञः पुरुषः । समुद्रे महान्तिरत्नानि सन्ति । एवमनेक विषेषणेऽपिवोध्यम् । प्राय इतिबचनात् क्वचिल्लिङ्ग संख्याविभक्तिर्नगृह्यते । यथादानपात्रंश्रोत्रियाः ॥ ५ ॥

लिङ्गसंख्याविभेदेऽपिउपमानोपमेयता
विभक्तिःपुनरेकैवउपमानोपमेययोः ॥ ६ ॥
प्रयुक्तेगम्यमानेवाउक्तेयुष्मदिमध्यमः
तथास्मदयुत्तमास्ताभ्यामन्यत्रप्रथमोभवेत् ॥७॥
एकदाचेल्क्रियाकालंबचनप्रतिपादनम्
धातोर्नामादिषूक्तेयःपरःसपुमान्भवेत् ॥ ८ ॥
यदाच्यर्थेननिर्देश्येभवतोयुष्मदस्मदो
द्वयोरपितयोर्योगेनधातोर्मध्यमोत्तमौ ॥ ९ ॥
गतिबुध्यशनार्थानां शब्दार्थानामकर्मणाम्
भवेदणिचयःकर्ताणिच्यसौकर्मसंज्ञकः ॥१०॥
हृक्रोरणिचियःकर्त्ता णिच्यसौकर्मवाभवेत्

आत्मनेविषयेतद्वदभिवादिदृशोरपि ॥११॥

लिङ्गभेदेतावत् । मत्तामातङ्गइवकामिनीविहरति । संख्याभेदे । सइवामीमधुरंगायन्ति लिङ्गसंख्ययोर्भेदेऽपि । स्वातंत्रीवप्रकृतयःसेव्याः । अभेदेतावत । तुरङ्गइवहस्तीधावति ॥ ६ ॥ त्वंकरोषि युवांकुरुथः यूयं कुरुथ । त्वंकुरुषयुवांकुर्वाथे यूयंकुरुध्वे त्वंक्रियसे युवांक्रियेथे यूयंक्रियध्वे । एवंकरोमीत्येतेष्वपिवोध्यम् । प्रयुक्तोगम्यमानेवा एवंनाम्नि प्रथमपुरुषोभवति ॥७॥यद्यस्मिन्काले क्रियाकालवचनानिप्रतिपाद्यानि भवेयुः । तदाधातोर्नाम्नियुष्मदस्मदोश्चयुक्तेषुसत्सु पुरुषाणांमध्येयःपरः सपुरुषोभवति । यथाभिसम्बन्धपर्यायतः प्रथममध्यमोत्तमेषु प्राप्तेषु परस्परापेक्षया वर्तमानेषुनिश्चयोऽयम् । यथा सचत्वंच पचथः अत्र परत्वात्प्रथमतो मध्यमःपरःसचाहंचपचावः सचत्वंचाहंचपचामः । अत्र प्रथममध्यमाभ्यामुत्तमःपरः । एषुप्रथमादिषुविधान सूत्रेकृते एवंपूर्व परादिभावः । तेनसचत्वंचभवथइत्यादि प्रयोगविपर्ययैरपिज्ञातव्यं ॥८॥ अत्वंत्वंसम्पद्यते अनह महं सम्पद्यते त्वङ्गवतिमङ्गवति ॥ ९ ॥ गमयति ग्रामंदेवदत्तं यज्ञदत्तः ॥ १० ॥ हरतिरुक्मिणींकृष्णः हारयतिरुक्मिणीं कृष्णेन कृष्णंवादूतः। करोतिभोजनंब्राह्मणःब्राह्मणेनवानृपतिः । वदेर्ञन्ता णिच् वास्यादित्येके । पूर्वमभिवादीतिरुपेस्थिते पुनर्हेतौणिच् । अभिवादयतेबृद्धंकुमारः । अभिवादयतेबृद्धान्कुमारजनककुमारेणेतिवा । दर्शयति राजानंभृत्यःदर्शयते राजानंभृत्यमीश्वरःभृत्येनेतिवा । आत्मनेपदविषयइतिनियमबचनात् परस्मैपदविषयेविकल्पोनभवति । अभिवादयतिदेवान्दानयतिना शंखवादकः । प्रयोज्यकर्त्तुरनुक्तत्वात्दानयति शब्दात्तृतीयैव ॥ ११ ॥

नीखादिह्वादिशब्दाय क्रन्दांकर्त्तानिकर्मकः
वहेरसरथौहेतौभक्षेधातोरहिंसने ॥ १२ ॥

प्रधानंनीवहादीनां द्रुहादेरुपसर्जनम्
कर्मस्वीयंणिजन्तानां वाच्यंकर्त्ताप्रयोजकः॥१३
अभावादभिधेयस्यअन्यदप्याहकर्मजः
नाभिधत्तेतुकालादीन् कर्मणोऽन्यस्यसम्भवे॥१४
यदेवोक्तंविशेषेषेण त्यादिनायदिवाकृति
विशेषणक्रियानुक्त यदुक्तंतद्भवेदिति ॥ १५ ॥

नीखादि हादि शब्दायक्रन्दामंषामाणिचियःकर्त्तासणिचि कर्मसंज्ञोनभवति । नयतेर्गत्यर्थतयाह्वयतेः शब्दार्थतया शब्दायक्रन्दोरकर्मकत्वात्प्राप्तेप्रतिषेधः । अजांनयतिग्रामंदेवदत्तेनयज्ञदत्तः । खादयतिकदलीं पोतेनजननी । ह्वाययतिस्येनःस्वेनपालेनकुतूहली । आदयतिगुडंबालेन जननी । शब्दायतेकीचकः । शब्दायतिकीचकेनमारुतः । क्रन्दतिबालः । क्रन्दयतिबालेनदुर्जनः । वहेरित्यादि । वहेरणिचियःकर्ता सणिचिकर्मसंज्ञोनभवति । वहतिभारंग्रामंदेवदत्तः वाहयतिभारंग्रामंदेवदत्तेनयज्ञदत्तः सारथौपुनःवहन्तिवलिवर्दाःशकटम् । वाहयतिवलिवर्दान्शकटम् ग्रामं सारथिः । भक्षेरित्यादि । अयनार्थत्वात्प्राप्तेप्रतिषेधः । भक्षयतिगुडं पोतः । भक्षयतिगुडंपोतेनजनकः । हिंसायांविधेरेव । भक्षयन्तिवलीवर्दाः शस्यम् । भक्षयतिवलिवर्दान्शस्यंगोरक्षकः ॥ १२ ॥ नीयतेग्राममजादेव दत्तेननेतव्यानीयमाना नीतावा । उह्यतेभारोग्वामंदेवदत्तेन । वोढव्यः वहनीयः वाह्यः उह्यमानः ऊढः सुवहोवा । आदिशब्दात् ह्रियतेभारोग्रामं देवदत्तेनत्यादि । दुहादिनांयथादुह्यते गोःपयोगोपेनदोग्धव्यादोहनीया वा । यथागम्यतेदेवदत्तेन यज्ञदत्तेनगौतिबुद्धीत्यादिबचनात् । अणिचिसतिकर्त्तारिणिचिसतिकर्मसंज्ञाविहिता । सदेवदत्तादिःणिजन्तानां स्वीयंकर्मतदेवप्रत्ययैरभिधीयते ॥ १३ ॥ दुह्यन्तेगवांगोषुवा पयांसिगापान । पाच्यते पौरवात्पौरवेवानपौषेकम्बलंब्राह्मणेन । चीयन्तेफलानिवृक्षाद्वृक्षस्य

वृक्षेवापथिकेन । मासंगुड़धानाः अनुभूयन्तेवा ॥ १४ ॥ त्यादिनाकृताच क्रियावताविशेष्येण यदुक्तंतयोर्विशेषेण क्रियया अनुक्तमपितदुक्तंभवति । यथा ओदनंभुक्त्वाग्रामंगच्छति देवदत्तः गतोवा । भोजन पूर्वकंगमनं करोतीत्यर्थः । दातुंपचति देवदत्तः पक्तावादानार्थं । भोजन दानाभ्यां विशेषणक्रियाभ्यां विशेष्येण गमन पचनक्रियावतात्यादिना कृताच कर्त्तरिविहितेनकर्त्तायदुक्तम् ॥ अतः प्रथमान अनुक्त वदाश्रिता तृतीयापि । एवमन्योऽपि । गुरुपूज्यते पूजयितव्योवा ग्रामंत्रय ब्राह्मणो भोज्यते भोजयितव्योवा । आनयनादि पूर्वकं तत्पूजादिकमित्यर्थः । भोक्तु मोदनं पच्यते पक्तव्योवा । दातुमुपक्रियते कटः उपकर्तव्योवा । भोजनार्थं तत्पचनमित्यर्थः । ततश्चानयनादिनाविशेषणेन अनुक्तमपि पूजादिक्रियावता विशेष्येण त्यादिनाचकर्मणिविहितेन उक्तं कर्म । अतः प्रथमापुनरुक्त कर्माश्रिता द्वितीयापि । १५ ।

उक्तमेवोक्तां यातिक्वचिदुक्त मनुक्ताम्
अनुक्त मपिचोक्तंस्यात्क्वचिदेव पदान्तरैः १६
परस्मै वक्तिकर्त्तारं त्रीनर्थानात्मनेपदम्
भावाप्य बिहितेसर्व धातुकेयंगतिर्भवेत् ॥१७॥
सर्वेविकरणाःकर्तृविहितेसार्वधातुके
आद्यतन्यांविभक्तौसिच्सन्स्यात्कर्तृकर्मणोः१८
चणौकर्तरिस्याता मिच्प्रायोभावकर्मणोः
स्वस्तनीस्यसिजाशीःषुभविकर्मणिचेज्वदिट् १९
हनिग्रहिदृशिभ्यश्चस्वरान्तेल्योविभाषया
अतिपत्तिःपरोक्षाचन्यस्तन्यद्यतनीतिच ॥२०॥

चतस्रोऽतीतकालेस्युर्वर्त्तमानातुसम्प्रति
भविष्यतिभविष्यन्ती आशीस्वर्थतोभवेत् ॥२१
श्वस्तनेश्वस्तनीनित्यंसैवान्यत्रविभाषया
विध्यादौसप्तमीपश्चादप्यनुज्ञाशिषोश्चसा ॥२२॥
शब्दान्तरप्रयोगेऽपिस्युरन्यत्रस्वगोचरात्
एवंविज्ञानविज्ञेन प्रयोगःप्रतिपाद्यताम् ॥२३॥
भावेकर्मणिकृत्यास्स्युःकर्मकर्त्तरिकेलिमः
अन्यत्रापिक्वचित्कृत्याःखलर्थोभावकर्मणोः॥२४
भावकरणयोःखःस्यादाशितोपपदाद्भुवः
ख्युट्कृञःकरणेवाच्येटक्सकौक्विप्चदृश्यते २५
गत्यर्थात्क्तोभवेद्भूतेभावाध्याधारकतृषु
अव्ययात्कर्तरिक्तःस्याद्यदिवाधारभावयोः ॥२६

आख्यातकृत्तद्धितसमासैर्यदुक्तं तद्रूप्येभिरेव पदान्तरैः पुनरुक्तांयाति । उक्तोभवतीत्यर्थः । यथानृत्यतिगायति नटः । पचति शृणोति छात्रः । अधीते अध्यापयति माणवकः । यजतियाजयतिद्विजः । ददाति प्रतिगृह्णातिद्विजः । देवदत्तेनोदनं पच्यते भुज्यतेवा । पाठकः पाठको देवदत्तः । दाताभोक्ता पुण्यवानदृष्टः सत्पुरुषः । ताम्बूलम्भक्षयन् विलासी हसति । हास्यतेवा तिर्यग्विलोकयन् कामिनीमालापयन् । सुन्दरोऽति सम्भाषते सम्भाष्यतेवा । जनैः पीयमानं मधुरायते । श्रूयमाणं वचनमद्भुतायते । अधीयानो ब्राह्मणः शोभते सद्भास्यतेवा । भुंजानोनावसीदति जनोदृश्यतेवा । वैयाकरणश्छात्रोविवदते । नैयायिकः पण्डितो जल्पति निराकृयतेवा । शतिकः पटः शोभते परिधीय

तेवा । दधि ओदनं प्रीणयति भुज्यतेवा । आरूढ वानरस्तरुः कम्पते निरीक्षतेवा । कृतप्रणामोजनः प्रारभते श्लाघ्यते ॥ दारितदारुः कुठारः कण्ठिमे भवति निशाम्यतेवा । दत्तगुड़ो ब्राह्मस्तुष्यति अनुगृह्यतेवा । उच्छन्न जनपदाभूमि रुद्वेजयते त्यज्यतेवा । लम्बकर्णः कर्णाटो विस्मापयते परिक्रियतेवा । मत्तवहुमातङ्गवनम् भाषयते गम्यतेवा । अनुक्तता मिति । क्वचित्पदान्तरैर्यातीतिसम्बन्धः नृत्यन्तंनटमवलोकयतेजनः । आगच्छन्तमभ्यागतंप्रत्युद्गच्छते आचारकुशलोजनः । वर्धमानंव्याधि मवधीरयति अनात्महितः । उपेक्षते शत्रुमुत्तिष्ठमानमनभिज्ञः । वैयाकरणमध्यापकंशब्दान् पृच्छतिजनः । शतिकमश्वंलभोवदान्यः । दधिकोदनेनप्रीयतेद्विजः नैयायिकेनपण्डितेनजीयतेसांख्यः । नेष्टिकाय तपस्विनेदेहीत्यादि । आरूढवानरंतरुमवलोकयतेकौतुकीकः । आरूढ़ वानरेणतरुणा विस्माप्यते लोकः । कृतप्रणामपुरुषायददातीत्यादि । अनुक्तमित्यादि । नृत्यते गीयते नटेन पद्यते श्रूयते छात्रेण । भोक्तु मोदनं पचतिबुभुक्षितः । दातुंधनमुपार्जयतिसत्पुरुषः । कटंकृत्वाददाति। आनीय गुरुं पूजयति । १६ । यस्मिन्नर्थेप्रत्ययोभवतिसउक्तोभवति। योयस्मिन्भवतितंप्रतिपादयितुमुपक्रमते । परस्मायित्यादि । पकारोच्चारणेऽपिसमुदायोऽपिनाम्नःप्रतीयते यथाभीमो भीमसेनः । तेन वर्तमानादीनांदशानामपिविभक्तिनां पूर्वाणिनवबचनानिरुसृङ्कसुश्च परस्मैपदंकर्त्तारंवक्ति प्रतिपादयतितत्रभवतीत्यर्थः । त्रीनित्यादि । त्रीनर्थान् कतृकर्मभावान् वक्तिप्रतिपादयतितेषुभवतीत्यर्थः । भावाद्ये त्यादि । भावश्चाप्यंचभावाप्ये । भावकर्मणितयोर्विहिते सार्वधातुके र्तमान सप्तमीपञ्चमीह्यस्तनाभूतार्थेषु परितोऽयंयण् भवेत् । अकर्म काद्धविभूयते भूयते भूयतामभूयत देवदत्तेन। भावस्यैकत्वादेकवचनमेव सकर्मकादप्यविवक्षितकर्मकाद्भावे । क्रियते देवदत्तेन । सानुबन्धेकृति सार्वधातुवद्भावात् । भूयमानं भवता । कर्माणि कटः क्रियते । १७ ।

सर्वेत्यादि । अतिजुहोति तितिक्षतअपराधान् । चिकीर्षतिकटं । पुत्रामच्छति पुत्रीयतिशासनिकः । अग्निकाम्यतिशीतार्त्तः पुत्रमिवाच रतिपुत्रीयति गुणवन्तंतस्मिन्निच्छतिकुटीयति । १८ । अजीगमत् इनन्तस्योभयपदित्वादात्मनेपदम् अजीगमदित्युभयत्रापि । अचीकर त्कटं सहायंदेवदत्तः । अवोचत् अगमत् ग्रामंदेवदत्तः । अकर्मका द्भावे अभावि । आसिदेवदत्तेन । कर्मणोऽविवक्षायां सकर्मकादपिभावे भवति अभावि च अपाठि । १९ । घानिता हन्ता ग्रहीता दर्शिता द्रष्टायिता दाता एवंस्वेयथा । घानिष्यते हनिष्यते इति । सिचियथा । अवधिषातां । अघानिषाताम् । आशिषियथा । घानिषीष्ट वधि षीष्टेत्यादि । २० । अतिपत्तिरित्यादि । स्वसंज्ञया कालस्यविशेषोविज्ञेयः क्रियातिपत्तावतीतेकाले क्रियातिपत्तिर्भवति कारण सामग्रीवैकल्यात् । क्रियातिपतनं भवनं क्रियातिपत्तिः । पितामहश्चेद्वर्षशतमजीविष्यत् । नवदशपितृव्याअभविष्यन् । अपितुनैवमभूत् एवमेधांसिचेदलप्स्यन्त ओदनमपक्ष्यन्तदेवदत्ताः । भविष्यति क्रियातिपतनेऽपीत्यन्ये । यदिवर्ष शतमजीविष्यंपुत्रशतमजनयिष्यं । अपितुनभविष्यति । एवंपरोक्षे ऽतीतेकाले अक्षणः परः परोक्षः । इन्द्रियाणामं विषय इति । तच्चवि- वक्षावशात् त्रिप्रकारोभवति । तथाचोच्यतेऽस्यार्थः वर्तमानादयोवि षयाः स्वगोचरात्स्वविषयात् । अन्यत्रशब्दान्तरसम्बन्धेभवन्ति तात्रयं संग्रहः । स्मशब्दस्यप्रयोगेतुननौनन्वोर्विभाषया । वर्तमाना विभ क्तिस्तुस्मृताभूतार्थवादिना । दहतिस्मत्रिपुंहरःदग्धवानित्यर्थः । ननु शब्दयोगे अकार्षिष्किम् । ननुकरोमिभोः । नन्वोःशब्दयोर्योगः । अकार्षीष्किम् । नकरोमिनाकार्षम् । अहन्नुकरोमिअहंवकार्षम् । अव्याप्योऽकर्मकोधातुस्तस्मात्कर्त्तरिआधारेभावे ऽतीतेक्तःस्यादित्यर्थः ॥ २६ ॥ भावेति । भक्षणंभक्षः सोऽर्थोऽभिधेयो यस्यासौभक्षार्थोधातु स्तस्माद्भावेऽधिकरणेकर्मणि अतीतेक्तः प्रकीर्त्तितः कथितः । भावेभ

भावेऽधिकरणेव्याख्येभक्षार्थात्तक्तःप्रकीर्त्तितः
भावमात्रेपुनर्धातोरविवक्षितकर्मकात् ॥ २७ ॥

क्षितन्देवदत्तेन देवदत्तस्येतिवा । अधिकरणे भक्षितं भोजनमोदनस्य विप्रस्यवा । अधिकरणवाचिन क्तस्यकर्त्तरिकर्मणिचोभयपदादपिषष्ठी । भक्षितमोदनंभविता । एवमन्येऽपि । भावमात्रेत्यादि । नविवक्षितंकर्म यस्यतस्माद्धातोरकर्मकाद्भाव एवअतीतेक्तोभवति । कर्मणोऽविवक्षा यांसकर्मकोप्यकर्मकइति । अविवक्षितधातोरकर्मकाश्रयः । कतृकरणयो रपिक्त प्रत्ययोभवतीति परिणतार्थः । भावेकृतन्देवदत्तेनदेवदत्तश्येतिवा ॥ २७ ॥

श्लिष्टःशीङोवसोजृष्आसःआसःस्थाजनरुहःपरः
त्रिषुक्तःस्यात्तथारम्भे शेषेभ्यःकर्मणिस्मृतः ॥२८॥
अनन्तरविधेयोऽस्य सर्वस्मादपिकारके ।
बहुष्वजादिभावेषु केऽपितेष्वपिकारके ॥ २९ ॥
द्रव्यमिवकृद्भावेस्यात्तेनद्विबचनाद्यपि ।
प्रायःसत्यामभिव्याप्तौ भावार्थविहिताःकृतः ॥ ३० ॥
एकःकर्त्ताक्रियानेकाश्चेत्तदापूर्वकालतः ।
भावेक्तादिरमुस्मिंस्तु तदर्थाचेत्क्रियापरा ॥३१॥
ण्वुल्तृचप्रभृतयः सर्वेदृश्यन्तेकर्तृवाचिनः ।
शतृशानच्कसुश्चैव सापेक्षाःस्युःक्रियान्तरे ॥ ३२ ॥
कृतोधात्वर्थसम्बन्धे स्युःकालान्तरवाचिनः ।
तद्धितास्त्यादयोप्येव मूहनीयाः प्रयोगतः ॥ ३३ ॥

अत्रार्थेनाभिधीयन्ते स्यादिप्रभृतयश्चते ।
सोऽनुक्तस्तत्रकर्मादौ द्वितीयाद्या यथायथम् ॥३४
द्वितीयाकर्माणि प्रोक्तातृतीयाकर्तृकारके
करणेचभवेत्सैव चतुर्थीसम्प्रदानतः ॥ ३५ ॥
पञ्चमीस्यादपादाने षष्ठीसम्बन्धमात्रके
कर्मकर्त्रोःकृतांयोगे द्वयोःप्राप्तौनकर्तरि ॥३६॥
वाघञादेरकाकारे द्वयोरपिभवेदियम्
कृत्यानांनद्वयोरेव वातुकर्तरिकेवले ॥ ३७ ॥
निष्टोदन्ताभ्ययोकञ्न शत्रानक्वसुभिर्नसा
खलर्थेभाविनीनाके णिनेर्योगाद्दणेऽपिन ॥३८॥
वातुकर्तरिभावेक्ते शतृङाकर्तरिद्विषः
कृञ्योयत्नेकृदाख्याते हृञ्श्रानुकृतौतथा ॥३९॥
स्मृतिर्हिंसार्थयोरेवं तृप्त्यर्थकरणेऽपिवा
आधारेवर्त्तमानेचक्तस्यसाकर्तृकर्मणोः ॥४०॥

श्लिष्टेति । एतेधातवः सोपसर्गा अनुपसर्गावाऽकर्मकास्तदा अकर्मकद्वारेण एभ्यः कर्तृकर्म भावेषुक्तो विहितएवास्ति । यदापुनरेते उपसर्ग विशेष सम्बन्धे सकर्मकाभवन्ति । तदाप्येभ्यः कर्तृकर्मभावेषु क्तःस्यादित्यर्थः । कर्तरि यथा । आश्लिष्टःकन्यांदेवदत्तः । कर्मणियथा । आश्लिष्टाकन्यादेवदत्तेन । भावेयथाआश्लिष्टंदेवदत्तेन देवदत्तस्येतिवा । यथा श्लिष्टादिभ्योभावे कर्मणिकर्त्तरितथारम्भेऽपि । आरम्भेकोर्थ ? आदि कर्माणि । प्रकृतःकटंभवान् प्रकृतःकटोभवता । प्रकृतंभवताभव

तोवा ॥ २८ ॥ अनन्तरेति । अस्येति पूर्वोक्त प्रत्ययस्य अनन्तर विधेयः क्तवतुरतीते सर्वस्मादपि गत्यादेरन्यतश्चधातोः कर्तरिभवति । यथा ग्रामंगतवानिति । बहुघञादिषु घञ् ल्युट् किन् नि अनि णच् अङ् क्यप् इ उण कि अल अथु नङ्एतेउनर्विंशति प्रत्याबहुबाहुल्येनतावद्भावेभवन्ति भावःपाकादिषु । घञ् ल्युट् । भवनम् । क्तिः । भूतिः । निः. ग्लानिः । अनि । भवनि । णच् ब्यवभाषी । अङ् । राजा इत्यादि । केऽपि इत्यादि । तेषु घञादिषुमध्येकेऽपि । घञ् ल्युट् आल् किन् क्यप् कनङ् कि अङ् एते दशप्रत्ययाकारेभवन्ति । भुज्यतेइतिभोगइत्यादिषुकर्मणिघञ् । जीर्यतेऽनेनेतिजारः इत्यादिषुकरणेघञ् उपेत्याधीयतेऽस्मादित्युपाध्यायः । अत्रापादानेघञ् । आधीयतेऽस्मिन्नित्याधार इत्यादिष्वधिकरणे घञ् । आस्यतइत्यासन मित्यादिषुकर्मणिल्युट् । पीयतेऽनेनेतिपानम् अत्रकरणे ल्युट् सम्प्रदीयतेऽस्मायिति सम्प्रदानामितिसम्प्रदानेल्युट् । अपादीयते यस्मादित्यपादानम् अत्रापादानेल्युट् । स्थीयतेऽस्मिन्निति स्थानमत्रा धिकरणेल्युट् । भुज्यतइतिभुक्तिरत्रकर्मणिक्तिः धियतेऽनयेतिधृतिरित्यादि षुकरणोक्तिः । प्रकृयतेऽस्मादिति प्रकृतिरित्यादावपादानेक्तिः । सम्भव त्यस्यामितिमम्भूतिरित्यत्राधिकरणेक्तिः । सम्भवत्यस्मादितिसम्भवइत्य पादानेअल । शेतेऽस्यामितिशय्यात्राधिकरणेक्यप् । परिषीदन्त्यस्या मितिपरिषदधिकरणेक्विप् । आयुध्यन्तेऽनेनेतिआयुधोऽत्रकरणेकः । पृच्छ्यतेऽस्मिन्नितिप्रश्नइत्यत्राधिकरणेनङ् । निधीयते इतिनिधिः कर्म णिकिः । उपाधीयते विशिष्यतेऽनेनेत्युपाधिरितिकरणेकिः । अवधीयते ऽस्मादित्यवधिरित्यपादानेकिः उदकंनिधीयतेऽस्मिन्नित्युदधिः इत्यधि करणेकिः । उपमीयतेनयेत्युपमाकरणेऽङ् । इत्यादिघञाद्येवमादयः प्रत्यया:कारकेभवन्ति ॥२९॥ सर्वस्यापिभावस्यस्वभावसिद्धैकवचनान्त वदस्त्येवयथोपदर्शितम् कृद्भावे द्रव्यवद्भवति येभावविहिताः कृत्प्रत्यया न्तास्ततोद्विवचनेऽपिप्रतिपत्तये । पाकः पाकौ पाकाः स्थितिः स्थिती

स्थितयः पचनम् पचनेपचनानि । आदिग्रहणात्कर्मादिष्वर्थे द्वितीयापि पाकम् पाकौ पाकान् । पश्यप्रायइतिबाहुल्येन सत्यामपिकर्मविवक्षायां भावेऽर्थेविहिताःकृत्प्रत्ययाभवन्ति कम्बलमादायदेशान्तरंगच्छति ॥३०॥ एकोभिन्नःकर्तानेकेतद्वेवहवः क्रियाश्चेत्तदापूर्वे क्रियाकालोयस्यधातोः तस्माद्भावे प्रत्ययः । ण्वुल् तुमुन् खमुञोभवन्ति । रिपुंजित्वानरपती राजते । भावंभावंक्षणमिहजले बुद्बुदाएवसम्पदोविद्यन्ते । तानसौ क्षसुइच एतेक्रियान्तर मपेक्ष्यभवन्ति । ओदनमेवसूपकारः पचति पच मानोवा स्वादुंकारंभुंक्ते ॥ ३१ ॥ धातूनांसम्बन्धे विशेष्यविशेषण लक्षणे स्वंकालंत्यक्त्वाविशेषणानिकृत्प्रत्ययविशेष्यस्यधात्वर्थस्यसाधवोभवन्ति अग्निष्टोमयाजीपुत्रोऽस्यजनिता । कृतःकटःस्वोभविता । तद्धितोयथा गोमानासीत भविता भविष्यतिदेवदत्तइत्यादि । यथाग्रामंजगामेत्या दितव्यादितद्धिताः ॥ ३३ ॥ द्वितीया तृतीया चतुर्थी पञ्चमी षष्ठी मन्तव्यः । यथाघटंकरोति ॥ ३४ ॥ पूर्वस्मात्षष्ठ्यनुवर्तते कर्मकर्त्रीरनु क्तयोः कृदन्तनां प्रयोगेषष्ठीभवति । कर्मणि । ओदनस्यपाचकः पक्तावा घटस्यकारकः कर्त्तावा । ण्वुल्तृचोः कर्तुरभिधानादनुक्तंकर्म । कर्त्तरि यथा । भवतः शायिका भवतआसिका बुञ्भावेभवति । इत्यनुक्तः कर्ताद्वयोरपिप्रस्तुतयोःकर्मकर्त्रीरेकस्मिन् प्रयोगे उभयप्राप्तौकर्तरिषष्ठीन भवति । पाचयिता सूपकारेणौदनस्यदेवदत्तः । दोहयितागोःपयोगोपा लेन गृहस्थः । कारयिताकटस्यदेवदत्तेन यज्ञदत्तः ॥ ३६ ॥ द्वयोः प्राप्तौ कर्तारिअनुवर्तते । घञादिरिति । घञ् ल्युट् क्तिन् अप अच् प्रभृतयउच्यते एषांप्रयोगेसति उभयप्राप्तौकर्त्तरि वा षष्ठी भवति । आश्चर्योगवांदोहः पयसोऽगोपालकेना गोपालकस्येतिवा । साधुखलुपयसःपानं राजहंसेन राजहंसस्यवा । विचित्राकृतिः सूत्रस्यपाणिनेर्वा । अकइत्यासम्बन्धोऽनु गृह्यमाणो बुञभावविहितएव गृह्यते । अकाकारौ स्त्रीभावाविहितावेवप स्यसाहचर्याद् गृह्यते । तत्रोभयप्राप्तिरिति आकारइति एवंप्रयोगद्वयोरपि

कर्तृकर्मणोरियंषष्ठी भवेत् पाचिका सूपकारस्योदनस्योभयत्र । भेदि काविभित्सावा रुद्रस्यजगतः । काष्ठस्यविप्रस्य चिकीर्षाकंटस्यदेवदत्तस्य ओदनस्य सूपकारस्य । कर्तृकर्मणोरनुक्तयोरपि कृत्यानां प्रयोगेषष्ठी न भवति । उभयप्राप्तौसत्यां । नेतव्योनयनीयोनेयोभारोग्रामंदेवदत्तेन । एव मन्यदप्यूहनीयम् । वात्वित्यत्रकृत्यानांकर्ता केवल एवानुक्तो भवति । नकर्म तत्रषष्ठीकर्तरिवा भवति । कर्त्तव्यः कटोदेवदत्तेनदेवदत्तस्येतिवा एवंकृत्यानामपीत्यादि ॥ ३७ ॥ कर्मकर्त्रोः कृत्प्रयोगे इत्यस्य प्रसङ्गेप्रति षेधोऽयम् । निष्ठाक्तक्तवतू उदन्द इण्णुच तृन् इत्यादिचाव्ययम् । तुमुन् क्त्वा ल्यप् णमुल् उक् उकञ इत्यादिभिर्भेष्यति विहितेनइना सम्बन्धे नचवुणा ताच्छीलिकस्यक : । अण बिषये णिनेश्चयोगात्कर्त्तरि कर्म णिचयथायोगे प्राप्तौषष्ठीनसम्भवति ग्रामंगतः ग्रामोगतस्तेन ग्रामंगतवा नित्यादि ॥ ३८ ॥ भावेविहितस्यक्तस्य योगे कर्त्तरिषष्ठिवाभवति कोकि लानां कूजितं मधुरकोकिलैर्वा हंसानां गतंसलिलंहंसैर्वा । द्विषः शतृ योगे कर्माणि षष्ठीवाभवति । चौरस्यचौरंवा द्विषन् कृदाख्यातयोः प्रयो गेपूतियत्ने गम्यमाने प्रयोगे करोतेः षष्ठीवाभवति । सतोत्तरगुणाधान तियत्नः । कृदितिनिष्ठादि पठिति इहयथा सम्भवमिष्यते । अङ्गाना मुपस्कुर्वाणं यौवनं युवानमुन्मादयति अंगानिवा । अङ्गानामुपस्कर्तुं यौ वनमुदयते अङ्गानिवा । हृञइच्यादि । हरतेः करोतेश्चानुकरणेऽर्थे तथेतिकर्मणि षष्ठीवाभवति । पितृमुखस्यामुखस्यानु हरेतिकन्याधन्या भवति पितृमुखंवा । पितुरनुहरेति पोतः पितरम्वानुकरोति । समुद्रस्या नुकुर्वन् तड़ागः कोऽपिशोभते समुद्रंवा ॥ ३९ ॥ स्मरणार्थस्यधातोः हिं सार्थस्यचधातोः कर्मणि षष्ठीवाभवति । भर्तुः स्मरन्तिप्राणान् त्यज न्तिभर्तारम्वा । तृप्त्यादि । तृप्त्यर्थस्यधातोः प्रयोगे करणे षष्ठीवा भवति । फलानांतृप्तः फलैर्वा । आधारइत्यादि । आधारऽता कालेवर्त्तमा नयःक्तोविहितस्तस्य कर्तृकर्मणोरुभयोरपि षष्ठीभवति । यथादेवदत्त

स्यग्रामोगतः । भुक्तमेवतत्पात्रमौदनस्य देवदत्तस्य ॥ ४० ॥

आधारे सप्तमीज्ञेया निमित्तात्कर्मयोगतः
क्तस्यचेत्प्रकृतव्याप्येक्रियाचिह्नंचयाक्रिया ४१
ततः सानादरे षष्ठी अपिनिर्धारणात्तथा
कर्म प्रवचनीयैश्च द्वितिया समयादिभिः ।४२
उपर्यादिभिरभ्यस्तैस्तसन्तैरूभयादिभिः
प्रतिप्रतिनिधौपरिवर्त्तेपंचमीप्रतिनायुनात् ४३
अधिनासप्तमी स्वाम्ये उपेनाधिकिनापिसा
तृतीया पञ्चमीचैव पृथङ् नानाप्रयोगतः । ४४
स्तोकादेःकरणेऽसत्वाद्दणाद्धेतोर्गुणोत्तुवा
यदर्थं किञ्चिदेवस्याच्चतुर्थी सम्प्रदानतः । ४५ ।
यस्मैकुप्यति तस्माच्च नम आदिभिरप्यसौ
व्याप्येऽनध्वनिचेष्टायां गत्यर्थानाम्विभाषया।४६।
मन्यतेरप्यनावादौ नादरोयत्रगम्यते
पञ्चमीचद्वितीयाच ऋतेयुक्तादियंद्वयी ४७
विनायुक्ताच्च सापिस्यात्तृतीयाच विशेषतः
तृतीयालक्षणेहेतौ सहार्थेनच युक्ततः ॥ ४८ ॥
षष्ठीस्याद्धेतुनासर्वा हेत्वर्थं सर्वनामतः
कर्मादिनाविवक्षाभि रूहनीयाःप्रयोगतः ॥ ४९
समस्यन्ते द्वितियाद्या यत्रनामपदैः परैः

सतत्पुरुषइत्युक्तो यत्परंतत्परंबहु ॥ ५० ॥

क्रियाश्रयभूतः कर्त्ताकर्मवा। आधृयेतव्यवस्थायतेऽस्मिन्नित्याधार यत्राधारस्तदधिकरणम् । एतच्चतुर्विधमधिकरणम् । औपश्लेषिकादिभेदेन तस्मिन् सर्वानुक्ते सप्तमीवाच्या। कटेआस्तइत्यादि । निमित्तादित्यादिचर्मणिद्वीपिनं हन्तेत्यादि। प्रत्ययस्येन प्रकृतेः क्तान्तस्यव्याप्येकर्मणि सप्तमीभवति । व्याकरणेऽधीतीच्छात्रः । क्रियेत्यादि । यः योक्तस्यकारकस्य क्रियाक्रियान्तरव्यवधिन्हंभवति तस्मात्सातिसप्तमी भवति । गोषु दुह्यमानास्वागतइत्यादि ॥ ४१ ॥ तस्मात्क्रियालक्षणाद्योगेऽनादरेऽर्थेसा सप्तमी अपिग्रहणात्षष्ठीभवति । यतः समुदायान् जात्यादि भिरेकैक शोनिर्धार्यते पृथक्कृयते तन्निर्धारणम् । तदर्थेषष्ठीसप्तम्यौभवतः पुरुषाणांपुरुषेषुवा क्षत्रियश्शूरः । कर्मेत्यादि । कर्मक्रियांप्रोक्तवन्तः कर्मप्रवचनीयाः । अर्थविशेषेषु परिभाषिकेषुवर्तमानाः । अभि परि प्रति आङ् अनु उप एतेपूर्वाचार्य प्रसिद्धसंज्ञाः । एषांकोवाकस्मिन् प्रवर्त्ततेऽत्युच्युते । लक्षणविप्सेत्थं भूतेष्वित्यादिषुचेतिभावो लक्षणे तावत्पर्वतमभिव्याप्यो मतेविद्युदित्यादि । समया निकषा. हा. धिगन्तरान्तरेणयोगे द्वितीया भवति । समयाग्रामामेत्यादि ॥ ४२ ॥

उपरि. अधस् आधि एभिःकृतद्विवचनैर्युक्तालिङ्गाद्वितीयाभवति । उपर्युपरिग्राममुज्जयिनीवसति । तसन्तैरित्यादि । उभयादितसन्तैर्युक्ता द्वितीयाभवति । उभयतोग्रामंकुटुम्बम्वसति । प्रतिनिधिर्मुख्यसदृशः । प्रतिनिधौपरिवर्तेचार्थेप्रतिशब्दयोगेनयुक्तात्पञ्चमीभवति । अभिमन्युरर्जुनतःप्रतिमुख्यस्यार्जुनस्य सदृश इत्यर्थः । परिर्वर्तावत् । माषान् तस्मैतिलेभ्यःप्रतियच्छति। माषान्ददाति तिलान् ग्रहीतुमित्यर्थः ।४३। अधिनासप्तमीत्यादि । अधिशब्देनयुक्तात्स्वाम्येऽर्थेसप्तमीभवति । अधिभुविराम । अधिरामभूः अधिब्रह्मदत्तेषु पाञ्चालाः । उपनेत्यादि। अधिकार्थेनोपशब्देनयुक्तादधिनासप्तमीभवति । उपखार्यांद्रोणः । चतु-

र्भिर्द्रोणैश्चखारीद्रोणाधिकाभवति । तस्यांसप्तमीभवति । तृतीयेत्यादि । पृथग्देवदत्तेन. मानादेवदत्तेनदेवदत्ताद्देवदत्तांवा । चकाराद्द्वितीयापि ॥ ४४ ॥ स्तोकादेरित्यादि । स्तोक. अल्प. कृच्छ्र. कतिपय. एतस्तोकादयः । एभ्योऽसत्त्ववाचिभ्योधर्ममात्रवाचिभ्यःकरणेपञ्चमीभवति लोकान्मुक्त इत्यादि । ऋणाद्धेतोरित्यादि । कणभूताद्दणात्पञ्चमीभवति । हेत्वर्थ तृतीयापवादःसहस्राद्धद्धः । शताधीन गुणात्तुवाति । द्रव्याश्रयोगुणः गुणाद्धेतुभूतात्पञ्चमीभवति । मोहाद्धद्धोलोकोमोहेनवेति किंचिद्वक्तुं क्रियार्थी यत्रचतुर्थीसम्मता यूपायदारुःकुण्डलायहिरण्यमित्यादि । ४५ । यस्मैकुप्यतीत्यादि । देवदत्तायकुप्यति देवदत्तायद्रुह्यतीत्यादि । नमइत्यादि । नमः स्वस्ति स्वाहा स्वधा अलं एतेनमादयः । एभियुक्ताल्लिङ्गाच्चतुर्थीभवति नमोदेवेभ्यः । गत्यर्थानांधातूनांव्याप्येकर्मण्यध्ववर्जिते चेष्टायांपरिस्पन्देचतुर्थीवाभवति । ग्रामंगच्छति ग्रमायवा अचेष्टायांन भवति मनसाग्रमेरुंगच्छति. एवमनध्वनीतिकर्मणि. अध्वानंगच्छतीत्यादि ॥ ४६ ॥ मन्यतेर्धातोर्नावादिवर्जितेकर्मणिचतुर्थीभवति । अनादरः कुत्सादिगम्यते. पक्षेद्वितीया । नत्वातृणंमन्येतृणायेतिवा । अकुत्सायां नभवति । अस्मान् हषदमन्येइत्यादि । एवंनावादौन । नत्वांनार्वमन्य इत्यादि ॥ ४७ ॥ विनायुक्तात्सतोऽपि द्वितीयापञ्चमीविशेषतश्च तृतीया । विनावातंवर्षतिदेवः । विनावाताद्विनावातेनवा । लक्षणहेतौ तृतीयाभवति । लक्ष्यतेयेनतल्लक्षणम् । लक्षणेनोपवीतेनब्राह्मणः । पुस्तकाच्छात्रइत्यादि । सहार्थेनेत्यादि । क्रियागुणद्रव्यैःसहभावःसहार्थेनयुक्ता ल्लिङ्गात्तृतीयाभवति । पुत्रेणसहागतः पिता । एवंसाकंसाकंसार्धंश्रमा प्रभृतयः ॥ ४८ ॥ षष्ठीत्यादि । तद्यथाहेतुशब्देनयुक्ताल्लिङ्गात्षष्ठीभवति अन्नस्यहेतोर्वसति । सर्वनाम्नेत्यादि । सर्वनाम्नोहेत्वर्थे शब्देनयुक्ता त्सर्वाविभक्तयोभवन्ति । को हेतुः कं हेतुं केनहेतुनाकस्मैहेतवे कस्माद्धेतोः कस्मिन् हेतौ । कर्मादिनामित्यादि । प्रयोगतःअभिधानात् कर्म

करणसम्प्रदानापादानासम्बन्धाधिकरणानां विवक्षयावक्तुरिच्छयाद्वितीयादयोविभक्तयऊहनीया इत्यर्थः । देवदत्तस्यमतंव्यवहरतिइत्यादि ४९ । समस्यन्त इत्यादि । कष्टंश्रितः इत्यादौद्वितीयासमस्यते । अहिदष्ट इत्यादौकर्तरितृतीयासमस्यते । करणेतृतीयायथा नखैर्भिन्नःनखभिन्नः । देवायेदं पुष्पम् । देवदेयंपुष्पमित्यादौ चतुर्थीसमस्यते । बृकभयमित्यादौपञ्चमीसमस्यते । राजपुरुष इत्यादौ षष्ठी समस्यते । अक्षेषु शौण्ड इत्यादौ सप्तमी । वह्वितिप्रायश इत्यर्थः । तेनचतत्पुरुषेऽस्मिन् क्वचित् । एवं पूर्वमपिनिपतति । तद्यथा द्वितीयासमासे प्राप्तोजीविकां प्राप्त जीविकः । इत्यादयोद्वितायाभिःसमस्यन्त इतिभावः ॥ ५० ॥

विशेषणं विशेष्येण एकार्थयदितद्द्वयम् ।
सकर्मधारयस्तस्मिन् प्रायःपूर्वविशेषणम् ॥ ५१ ॥
तद्धितार्थेसमाहारे उत्तरस्मिन् पदेपरे ।
सप्तमासोद्विगुर्यत्र संख्यासंख्येयवाचिभिः ।५२।
उभौतत्पुरुषावुक्तौ तेनकार्यंतदाश्रयम् ।
लक्ष्यतांलक्ष्यलक्ष्येषु लक्षणेक्षणदक्षिणाः ॥५३॥
यत्रानेकंपरस्यार्थे बहुव्रीहिः सउच्यते ॥
सरूपेयादवायुद्धे दिशांनाम्नोवादिश्यपि ५४ ॥
षष्ठीतत्पुरुषेराजामनुष्याणांपरासभा
कर्मीवेशालाभिधेयापिछायावाहुल्यपूर्विका ॥५७
वास्युःसेनासुराशाला निशाच्छायाइमेपुनः
उपज्ञोपक्रमौनित्यं तदादित्यप्रकाशने ॥५८॥

रात्रान्हौपुंसिविज्ञेया वहोसुदिनपुण्यतः
यथोऽसंख्यात्परःक्लीवेनकोर्वेरितिदर्शितम्५९
सम्बन्धेकारकेवृन्दे भावेगोत्रेपरत्रच
कथ्यन्तेतद्धितारूढाःसमासान्ताव्ययाअपि६०
इति

विशेषणमित्यादि । विशिष्यतेऽनेनेति विशेषणम् । विशिष्यतएतदिति विशेष्यम् । विशेषणानामविशेष्येणनाम्ना परपदेन समस्यते । विशेषणविशेष्यंचयद्विग्रहे एकाभिधेयंभवतः । एकस्मिन्वाक्ये प्रवर्त्ततइतियावत् । नीलञ्चतदुत्पलंचनीलोत्पलमित्यादि ॥ ५१ ॥ तद्धितार्थइति । अत्रसंख्या विशेषणं संख्ययवाचोभिः परपदेवविशेष्यैः समस्यतेतद्धितार्थविषयभूतेऽभिधेयेचसमाहार । उत्तरस्मिन्पदेपरतः समासोद्विगुर्ज्ञेयः । पंचानांगवांसमूहः पंचगवंरूप्यः । एवंपचकपालंहविः ॥ ५२ ॥ उभावित्यादि । द्वौद्विगुकर्मधारयौ तत्पुरुषावाभिहितौ तेनतत्पुरुष माश्रित्य यत्कार्यं विहितं तदपिस्यात् । तेनमहाराजः ॥ ५३ ॥ यत्रेतिअनेकं देवहूनिपदानियत्रान्यस्यपदस्यार्थे वर्त्तमानानिसमस्यन्ते ससमासोबहुव्रीहिरभिधीयते । अभिधानात्प्रायःसमानाधिकरणानामेवपदानांवादितव्यः । यथाप्राप्तोदर्कासामः । निर्जितोऽरिर्येनसानिर्जितारिर्वीरः । सरयुइत्यादि । यत्रसमानरूपेद्वेपदेनाम्नितत्रग्रहोत्वातेन ग्रहत्यर्थं द्वेग्रहणप्रहरणोपाधिनिमित्तअन्यपदार्थे समस्यतेसोऽपिबहुव्रीहिर्भवतिकेशेकेशेगृहीत्वायुद्धं प्रारब्धंकेशाकेशि । दिशामित्यादि । यत्रादिशब्देनाम्ना विदिशिवाच्या यांसमस्यते सोऽपिबहुव्रीहिर्भवति । दक्षिणस्याश्चपूर्वस्याश्चदिशोर्यदन्तरालंसादाक्षिणपूर्वादिक् ॥ ५४ ॥ इतरेतरयोगसमाहारेचद्वयोश्चार्थयोः समस्यतेससमासोद्वन्द्वसंज्ञोभवति । तत्रेतरेतरयोगे द्वन्द्वावयवप्रधानइ

तिअवयवाश्रयंद्विवचनबहुवचनेभवतः । परपदलिङ्गंचसमाहारेचद्वन्द्वस्तिरोहितावयवभेदः । समुदायस्यैकत्वादेकवचनम् । नपुंसकलिङ्गंचभवति । स्त्रीच पुरुषश्च स्त्रीपुरुषौ विभौ । स्त्रीपुरुषामत्यादि । स्त्रीचपुमांश्चनपुंसकंचस्त्रीपुंनपुंसकानि । स्त्रीपुंनपुंसकम् ॥ ५५ ॥ तस्मिन्नित्यादि । तत्रद्वंद्वयोर्मध्ये यदल्पस्वरं तदल्पस्वरं यद्यप्यर्चितप्रायस्तत्पूर्वं निपतति । प्लक्षन्यग्रोधम् । द्वयोरितिकिम् । शंखदुन्दुभिवीणाः प्रायेतिबचनात् । उलूखल मूशले । तण्डुलकुलायावित्यादि । यत्रेत्यादि । यस्मिन् समासे विभक्त्यादावर्थे वर्तमानमसंख्यमव्ययंसमस्यतेसोऽव्ययीभावः । विभक्त्यर्थादौकारकावित्यर्थः । तत्रयदापिकारकादिष्वर्थेषु बहुष्वव्ययं समस्यते तथापिबाहुल्यव्यवहारतयातिशययोगिष्वर्थेष्वव्ययीभावः समासोदृश्यते । यथा अधिस्त्रीत्यादि ॥ ५६ ॥ अराजशब्दादमनुष्यशब्दवाचिनश्चपरः षष्ठीतत्पुरुषान्तसमासः सभाशब्दानपुंसकलिङ्गंभवति । उक्तंच अशालार्थे इत्यादिप्रतिषधादिह सभाशब्दोगृहार्थोगोष्वर्थश्चगृह्यते । अराजशब्दतावत् नरपतिसभम् एवचक्रवर्त्तिसभम् । अराजशब्दःपर्युदासादीश्वरार्थादेव । तेनेहनभवति । देवसभा अमनुष्यशब्दः पिशाचादौरुढः । पिशाचसभम् । इहनभवति देवदत्तसभा । षष्ठीतत्पुरुषान्तोऽशालावाचकोऽपि सभाशब्दानपुंसकंभवति । दासीसभम् । वेश्यासभम् । अशालेति । अनाथसभा अनाथकुटीत्यादि । छायेत्यादि षष्ठीतत्पुरुषाच्छायाशब्दोबाहुल्ये गम्यमानेनपुंसकम्भवति । गृध्राणांछायागृध्रच्छायम् । एवंशलभच्छायम् ॥ ५७ ॥ वास्युरित्यादि । एतेशब्दाःषष्ठीतत्पुरुषान्ताः पुनर्वानपुंसकानिभवन्ति । सुराणांसेनासुरसेनम् । सुरसेनेत्यादि षष्ठीतत्पुरुषान्तावुपज्ञोपक्रमौनित्यं नपुंसकेभवतः । यद्यु ज्ञेयस्यचोपक्रमस्यचार्थस्य प्रकाशनंभवति । चन्द्रोपज्ञंप्रशंसकंव्याकरणम् । वेदोपक्रमंधर्मम् चन्द्रेणवेदेनचतेषांप्रथमतोऽवधारणम् ॥ ५८ ॥ अहश्चरात्रिश्चअहोरात्रः एवम

पराह्नः । पूर्वाह्णमध्याह्नेत्यादि । अहन्शब्दःसमासान्तः पुँल्लिङ्गोभवति । एकंचतदहश्चेत्येकाहः । द्वयोरह्नोस्समाहारोद्व्यहः । सुदिनपुण्याभ्यांनभवति. सुदिनाहम्. पुण्याहम् । पथेत्यादि । पथिन्शब्दः समासान्तोऽव्ययात्परोनपुंसकंभवति । नायपन्थाः अपथम् । नर्कार्धरित्यादि । कुशब्दात्परः समासान्तोपथिन्शब्दोनपुंसकंभवति । कुत्सितःपन्था कुपथः । वेरित्यादि । विशब्दात्परोयथाशब्दोनपुंसकंवाभवति । विरुद्धःपंथाःविपथो विपथंवा॥५९॥सम्बन्धइत्यादि । सम्बन्धेसम्बन्धसमान्येइत्यर्थः सम्बन्धे तद्धितोयथा.पृथायाःअयंपार्थः । कारके.कर्ताकर्मचकरणंसम्प्रदानंतथैवच अपादानाधिकरणमित्याहुः कारकाणिषट् एष्वित्यर्थः । तद्यथा क्रमात् । वररुचिनाकृतोग्रन्थः वाररुचः । पुराणमधीतेपौराणिकः । कषायेनरक्तं वस्त्रंकाषायम् । ब्राह्मणायहितंब्राह्मण्यं । मथुराया आगतो माथुरः । ग्रामेभवो ग्राम्यः । इत्यादि । वृन्देसमूहेऽर्थेऽणादयो यथा. अण्. तल. प. इनो. त्र क घञादयः । अणि. शुकानां समूहः शौकम् । तलि. ग्रामाणांसमूहो ग्रामता । य. खलानां समूहः खल्या । इनो । डाकानां समूहो डाकिनो । गवां समूहो गोत्रा. कद्य चि. रथानां समूहो रथकद्यः । एवमन्यदप्यूह्यम् भाव. त्व तल् घञादयः । ब्राह्मणत्वम् । ब्राह्मणता । ब्राह्मब्राह्मण्यम् । इत्यादि । गोत्रेणगार्ग्यः । नाडायनः अपरत्र अपरस्मिन्नर्थे मतुप् । अच्. इतिटन्. तरप्. तमप्. इसुन्. इष्ठन्. इत्यादयः । केऽपि तद्धिताऽरूढा कथ्यन्ते यथा विंशति त्रिंशत् चत्वारिंशत् षष्ठासप्तत्यशीति नवति. शतम् एतेरूढाः । टा अवयवार्थशून्याइत्यर्थः । एवमन्यत्रापि समासान्ताव्यया अपोति समासान्ता इत्यधिकृत्य प्रत्ययाइत्यधिप्रत्यया इत्यर्थ । अव्यया अव्यय संज्ञका इत्यर्थः । आमूल्. कृत्वसुच्. शस्. धा. तसिल् त्रल्. थाल्. अर्हिल्. दाच् थमुञ्. लञ्. आर्हव्. आच्. इत्यादयः । अपूल किंतराम्. किंतमाम्. कृत्वसुच्. पंचकृत्वः. सुच्. द्वि. त्रि. चतुः बहुशः. अल्पशः. धा. दशधा. तसिल्. सर्वतः.

तः त्रल् यत्र तत्र. अमुत्र. अत्र. थाल् यथा.तथा. इतरथा, अहिर्हि तर्हि. कर्हि. दाच्. यदा. तदा कदा. सर्वदा. थमुञ्. इत्थम्. हच्. दक्षिणाहि. आच्. दक्षिणा । एवमन्यत्रापि बहुधाप्रत्यया यय संज्ञका ग्राह्याः ॥

॥ इति चङ्गदास कारिका समाप्ता ॥